संस्कृत-वार्ता:
29.07.2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- विदेशमन्त्रिणा जयशंकरेण टोक्योनगरे 'क्वाड्' इति विदेशमन्त्रिणां सम्मेलनानन्तरं प्रोक्तं यत् 'क्वाड्' इति अन्यतम: संघ: अस्ति, यो हि भारत-प्रशान्त-महासागरीय क्षेत्राय निर्बाध-सुरक्षित-सम्पन्नश्च अवसरा: प्रददाति।
- अद्य केन्द्रीयान्वेषणाभिकरणेन दिल्ल्या: मुख्यमन्त्रिणम् अरविन्दकेजरीवालं विरुध्य राउज्-एवेन्यू इति न्यायालये आरोपपत्रं प्रस्तुतम्।
- सर्वोच्चन्यायालयः बिहारे आजीविका-प्रवेशयोः पञ्चषष्टि-प्रतिशन्मितं जात्याधारितम् आरक्षणम् विरुध्य निषेधाज्ञां प्रवर्तितुं पटना-उच्च-न्यायालयस्य पारितादेशम् अवरोद्धुम् स्वीकृतिम् नायच्छत्।
- व्याघ्राणां प्राकृतिकनिवासस्थानरक्षणेन सह वैश्विकव्यवस्था-प्रवर्तनपूर्वकं व्याघ्रसंरक्षणविषये जनजागृतिः, समर्थनाय च अद्य अन्ताराष्ट्रियव्याघ्रदिवसः आचर्यते।
- वेनेजुएलायां निकोलस-मादुरो तृतीयवारं राष्ट्रपति-निर्वाचने विजयमध्यगच्छत्।

<u>जयशंकर: - क्वाड</u>

विदेशमन्त्रिणा जयशंकरेण प्रोक्तं यत् समयोऽयं संघर्षपूर्णोऽस्ति, स्थिरतायां, सुरक्षायां, प्रगतौ सम्पन्नतायां वा भवतु अन्ताराष्ट्रियै: विश्वस्तमित्रै: सहयोगोऽपेक्षते; तदर्थं 'क्वाड्' इति अन्यतम: समकालीन: उदाहरणभूतोऽस्ति। श्रीजयशंकर: 'क्वाड्' इति समूहान्तर्गतानां विदेशमन्त्रिणां सम्मेलनानन्तरं वार्ताहरै: सह सम्भाषयन् टोक्यो-नगरे उक्तवान् यत एतत् सन्तोषप्रदम् अस्ति, यत् कियता गाम्भीर्येण, व्यवस्थिततया च क्वाड् इत्यनेन विदेशनीतय: अन्तर्निहिता: सन्तीति। तेनोक्तम् यत् अद्यतनीयम् उपवेशनम् दिङ्निर्देशनदृष्ट्या महदुपकारकं वर्तते। श्रीजयशंकर: अवोचत् यत् विश्वसनीयाया: दूरसचार-प्रौद्योगिक्या: कार्याचरणम् अद्य अन्त: सागरीय सम्पर्कतन्त्रविस्तारश्च आपदुद्धाराय, जलवायुकार्येभ्य:, आधारभूतसंरचनाभ्य: क्षमताभिवर्धनपूर्वकं प्रशिक्षणाय, आतंकवादस्य प्रतिकाराय च सहायकभूतोऽस्ति। डॉ.सुब्रह्मण्यम् जयशंकर: टोक्यो-नगरे क्वाड् इत्यस्य विदेशमन्त्रिणां सम्मेलने स्वसमकक्षै: अमेरिका-ऑस्ट्रेलिया-जापानस्य च विदेशमन्त्रिभि: समम् आसीत्।

दिल्ली-आरक्षिबलम्

दिल्ली आरक्षिबलेन प्रशासनिकसेवासन्नद्धताक्षेत्रे जलाप्लावनात् मृतछात्रत्रयस्य प्रकरणे इतोऽपि पञ्चजना: निगडिता: सन्ति। संस्थाया: स्वामी, अन्त:भूस्थितस्य भवनस्य द्वारघातकादीन् समेत्य सप्त-जना: निगडिता: सन्ति। दिल्ली आरक्षिबलेन च प्रोक्तं यत् दोषिण: कठोरन्यायाचरणेन प्रतिदण्डिष्यन्ते इति। मध्यदेहल्ल्या: उपारक्षिनिदेशकेन एम्.हर्षवर्धनेन प्रोक्तमस्ति यत् अनेन प्रकरणेन सम्बद्धा: सर्वेऽपिजना: पर्यवेक्षणमार्गेण निस्सारयिष्यन्ते, सर्वविधदृष्ट्या च प्रकरणस्य निरीक्षणं पर्यवेक्षणञ्च भविष्यतीति। तेन एतदपि उक्तं यत् अन्तर्भूमीयसदने व्यावसायिक-कार्याचरणस्य न कोऽपि अधिकारादेश: स्वामिन: पार्श्वे आसीदिति। आरक्षिबलेन प्रोक्तं यत् अत्र नगरनिगमस्य अपि काचित् भूमिका अस्ति, नास्ति वेति निरीक्षिष्यते। साम्प्रतं यावत् त्रयोदश-शिक्षणसंस्था: राजेन्द्रनगरक्षेत्रे नगरनिगमदिल्ली इत्यनेन पूर्णत: पिहिता: सन्ति।

केन्द्रीयान्वेषणाभिकरण-केजरीवाल:

अद्य केन्द्रीयान्वेषणाभिकरणेन दिल्ल्या: मुख्यमन्त्रिणम् अरविन्दकेजरीवालं विरुध्य राउज्-एवेन्यू इति न्यायालये आरोपपत्रं प्रस्तुतम्। केजरीवाल: यो हि आम-आदमी-पार्टीति दलस्य राष्ट्रियसंयोजकोऽपि अस्ति, स: जूनमासस्य षड्विंशे दिनांके केन्द्रीयान्वेषणाभिकरणेन तिहाड़कारागारात् निगडितोऽस्ति। यत्र स: धनशोधनप्रकरणान्तर्गतं प्रवर्तननिदेशालयेन निगृहित: आसीत्।

प्रधानमन्त्री-वित्तसङ्कल्पनासत्रम्

प्रधानमन्त्री नरेन्द्रमोदी केन्द्रीय-वित्तसङ्कल्पना-सत्रस्य अनन्तरं नवदिल्ल्याम् आयोजयिष्यमाणस्य सम्मेलनस्य उद्घाटन-सत्रं सम्बोधयिष्यति। सम्मेलनस्य अस्य विषयः अस्ति। 'जर्नी टुवर्ड्स विकसित भारत' सम्मेलनमेतत् भारतीयोद्योग-परिसंघः आयोजयति सहैव अस्योद्देश्यं विकासाय प्राशासनिक-दृष्टिकोणस्य अस्यां दिशि उद्योगस्य च भूमिकाम् अभिलक्ष्य रूपरेखायाः प्रस्तुतीकरणम् अस्ति । अस्मिन् सम्मेलने उद्योग-सर्वकार-राजनयिकसमुदाय-विशेषज्ञ-समुदायान् अन्यजनान् चातिरिच्य सहस्राधिकाः प्रतिभागिनः सम्मिलिताः भविष्यन्ति। अनेन सह एव देश-विदेशानां सीआईआई इति विभिन्न-केन्द्राणां नैके जनाः सम्मेलनेन सम्पृक्ताः भविष्यन्ति ।

मनसुख-मांडविया

श्रमाजीविका-मंत्री डॉ मनसुख-मांडविया अकथयत् यत् देशे वित्तोपार्जनस्य वृत्तेः च विविधावसराः सन्ति सहैव वर्तमानसर्वकारस्य नीतिगत-हस्तक्षेपेण एव देशे वृत्तिरहितानां प्रतिशतम् अपचित्य त्रि-दशमलव-द्वि-प्रतिशन्मितम् अभवत्। लोकसभायां प्रश्नकालावधौ पूरक-प्रश्नानाम् उत्तराणि यच्छता तेन आशा प्रकटिता अस्ति यत् आगामिवर्षेषु वृत्तिरहितानां प्रतिशतता त्रि-प्रतिशन्मिततो न्यूना भविष्यति। वित्तसंकल्पनाप्रपत्रं प्रशंसयन् डॉ मांडविया अकथयत् यत् प्रधानमन्त्रिण: वित्तानुदानेन पंचवर्षाणाम् अवधौ चतुष्कोटि-युवानः वृत्तिकौशलयोः अवसरान् प्राप्स्यन्ति। सः प्रोक्तवान् यत् एतल्लक्ष्यं प्राप्तुं द्वि-लक्ष-कोटिरुप्यकाणि व्ययीकरिष्यन्ते। डॉ. मांडविया अकथयत् विगतेषु केषुचित् वर्षेषु श्रम-बल-योगदानमितौ श्रमिकजनसंख्यायाः अनुपाते च वृद्धिः संजाता अस्ति । सः प्रोक्तवान् यत् श्रम-बल-योगदानं चतुश्चत्वारिंशत्प्रतिशन्मितं, श्रमिक-जनसंख्यायाः अनुपातश्च चत्वारिंशत्प्रतिशन्मितं अभवताम् । सः इदमपि प्रोक्तवान् यत् विगते एकस्मिन् दशके ग्रामीण-क्षेत्रेषु वृत्यावसरा: सम्वर्धिता: समिति ।

सर्वोच्चन्यायालयः/वार्षिकी

सर्वोच्चन्यायालयः स्वस्य पञ्चसप्ततिवर्षपूर्तावधौ संस्मारकत्वेन अद्यारभ्य विशेषलोक-न्यायालयसप्ताहम् आयोजयति। आकाशवाण्या सह अनन्यतया सम्भाषयन् न्यायाधीशः के.वी. विश्वनाथन् उक्तवान् यत् अस्योपक्रमस्य उद्देश्यं सर्वोच्चन्यायालये लम्बितप्रकरणानामुपरि दृष्टिपातो वर्तते। सः प्रकरणपञ्जीकर्तृभ्यः लोक-न्यायालयस्य अथवा जनन्यायालयस्य लाभग्रहणाय प्रोत्साहयति स्म। सः उपक्रममिमं स्वेच्छया, सौहार्दपूर्णतया च विवादनिराकरणस्य मञ्चः अस्तीति वर्णितवान्। न्यायमूर्तिः विश्वनाथनः इत्यपि अवदत् यत् लोक-न्यायालयाः तादृशाः साधनभूताः सन्ति यत्र न्यायस्य प्राप्तिः कुशलतया अल्पव्ययेन च भवितुं शक्नोतीति।

सर्वोच्चन्यायालयः बिहार

सर्वोच्चन्यायालयः बिहारे आजीविका-प्रवेशयोः पञ्चषष्टि-प्रतिशन्मितं जात्याधारितम् आरक्षणम् विरुध्य निषेधाज्ञां प्रवर्तितुं पटना-उच्च-न्यायालयस्य पारितादेशम् अवरोद्धुम् स्वीकृतिम् नायच्छत्। न्यायालयेन बिहार-सर्वकारस्य न्यायालये प्रतिष्ठापितां प्रार्थनां च अधिकृत्य सूचनादेशः अपि प्रकाशितः अस्ति। अवधेयं यत् विगते मासे पटना-उच्च-न्यायालयेन वञ्चित-वर्गाणां, अनुसूचित-जाति-जनजाति-वर्गाणां च कृते प्राशासनिकसेवासु राज्यस्य उच्च-

शिक्षण-संस्थानेषु च प्रवेशाय आरक्षणम् पञ्चाशत्-प्रतिशन्मितततो सम्वर्ध्य पञ्चषष्टि-प्रतिशन्मितं कर्तुं बिहार-सर्वकारस्य अधिसूचना निरस्तीकृता आसीत् ।

<u>व्याघ्रदिवस:</u>

अद्य अन्ताराष्ट्रियव्याघ्रदिवसः आचर्यते। अस्य दिवसस्य मुख्योद्देश्यम् व्याघ्राणां प्राकृतिकनिवासस्थानरक्षणेन सह वैश्विकव्यवस्था-प्रवर्तनपूर्वकं व्याघ्रसंरक्षणविषये जनजागृतिः, समर्थनञ्चास्ति। विश्ववन्यजीवकोषानुसारं भारते सम्प्रति व्याघ्रसंख्या वर्धमाना स्थिरा च वर्तते। भारतस्य व्याघ्रसंरक्षणवर्गः त्रिसप्तत्युत्तरैकोनविंशतितमे वर्षे स्थापितः। सम्प्रति भारते विश्वस्य अशीतिप्रतिशतपरिमिताः व्याघ्राः निवसन्ति।

पर्यावरण-वन जलवायु-परिवर्तन च मन्त्री भूपेन्द्र-यादवः अद्य विभागस्य राज्यमंत्री कीर्तिवर्धन-सिंहेन सह राष्ट्रिय-व्याघ्र-संरक्षण-प्राधिकरण-नवदिल्ल्याः पञ्चविंशोपवेशनस्य अध्यक्षतां कृतवान्। श्रीयादवेन व्याघ्रसंरक्षणे स्वदेशीयप्रौद्योगिक्याः उपयोगस्य सम्भावनायाः अन्वेषणस्य आवश्यकतायाविषये बलं दत्तम्।

<u>ऋतुविज्ञानविभाग:</u>

भारतस्य ऋतुविज्ञानविभागेन आगामिषु पञ्चदिनेषु हिमाचलप्रदेशे, उत्तराखण्डे, पूर्वराजस्थाने च व्यापकरूपेण लघुतः मध्यमपर्यन्तं वर्षाणां पूर्वानुमानं कृतम् अस्ति। आगामिषु पञ्चदिवसेषु जम्मू-कश्मीर-लद्दाख, गिल्गित-बाल्तिस्तान-मुजफ्फरबाद, पञ्जाब, हरियाणा, चण्डीगढ, दिल्ली, उत्तरप्रदेश, पश्चिमराजस्थानेषु च विकीर्णवृष्टेः पूर्वानुमानं कृतमस्ति। ऋतुविज्ञानविभागेन इत्यपि उक्तं यत् अद्य पूर्वराजस्थानस्य उपरि अपि च बुधवासरे पश्चिमोत्तरप्रदेशस्य हिमाचलप्रदेशस्य उत्तराखण्डस्य च उपरि एकाधिकस्थानेषु अत्यन्त प्रचण्डवृष्टिः सम्भवति। बुधवासरे झारखण्डस्य उपरि कतिपयस्थानेषु अपि च मंगलवासरात् गुरुवासरपर्यन्तं नागालैण्ड्, मणिपुर, मिजोरम्, त्रिपुरादीनामुपरि अपि प्रचण्डवृष्टिः भविष्यति। अद्य उत्तरगुजरातप्रदेशस्य अनेकभागेषु प्रचण्डवृष्टिः अभवत्। निरन्तरं वर्षाणां अनन्तरं पञ्चचत्वारिंशत् जलबन्धाः अतिप्रवाहिताः सन्ति, ते च उच्चसचेतनायां स्थापिताः सन्ति । राज्यस्य बृहत्तमः जलबन्धः सरदार सरोवरजलबन्धः अद्यावधि त्रिपञ्चाशत् प्रतिशतम् जलसञ्चयस्य साक्षी अभवत्।

निकोलस-मादुरो-राष्ट्रपतिनिर्वाचनम्

वेनेजुएलायां निकोलस-मादुरो तृतीयवारं राष्ट्रपति-निर्वाचने विजयमध्यगच्छत्। निर्वाचन-परिषद: प्रमुख: एल्विस-एमोरोसो अकथयत् यत् गणितेषु अशीतिप्रतिशन्मितेषु मतेषु राष्ट्रपति: मादुरो एकपंचाशत्प्रतिशन्मतानि प्राप्य विजयं प्राप्नोत् ।

।। इति वार्ता: ।।